# अष्टमः पाठः

# कुरु सिंहावलोकनम्

## पाठप्रवेशः

वर्णनाप्रधानासु साहित्यरचनासु तत्र तत्र अतिशयोक्तयः दृश्यन्ते । या वर्णना वास्तविकताम् अतिक्रम्य चमत्कारपूर्णतया लसति सैव अतिशयोक्तिः। अतिशयोक्तिसमृद्धानि द्वित्राणि वाक्यानि सम्भाव्य वदन्तु ।

## आमुखम्

विश्वासप्रमाणमधिकृत्य प्रचलिता भवति अनुष्ठानकला इति पूर्वस्मिन् पाठे वयं पठितवन्तः । लोकोक्तिम् अनुसृत्य स्वानुभवं च आधारीकृत्य भवति लौकिकन्यायः। विशालान् आशयान् संक्षिप्ततया युक्त्यनुसारं च वक्तुम् अनेन शक्यते । सहस्राधिकाः लौकिकन्यायाः संस्कृतवाङ्मये सन्ति । तेभ्यः चतुरः न्यायान् आख्यानरूपेण अत्र प्रतिपादयति ।

कश्चिद् बालकः पठनात् विमुखस्सन् भोजनं, क्रीडनं, शयनं च कृत्वा अलसतया दिनानि नयति स्म । अतः तस्य माता अतीव दुःखिता अभवत् । सा तस्य अध्यापकमुपगम्य सर्वमपि वृत्तान्तं तस्मै न्यवेदयच्च ।





अध्यापकः अवदत् –" बालोऽयं पठने विमुखः इति जानामि । तस्मै कथा एव रोचते । अतः इदानीं **गुडगुलिकान्यायेन** एव तमहं पाठयामि । तिक्तरसां गुलिकां शर्करया सह ददाति चेत् शिशवः खादेयुः । तथा विविधरसयुक्ताभिः कथाभिः सह गुणपाठान् तम् उपदिशामि" इति ।

एवं बहुभिः गुणपाठकथाभिः तस्य आलस्यम् अध्यापकः क्रमेण दूरीचकार ।



तदनु स शिष्यः पठनतत्परः सन् विविधानि पुस्तकानि पठितुमारभत । एकदा तस्य वाचनतात्पर्यं समीक्ष्य अध्यापकः तम् अवदत् । "वत्स! किं पठनीयम् इति विषये चिन्तया अलम् । समस्तमपि पठितव्यं भवति । तथापि **नीरक्षीरन्यायेन** यदवश्यं युक्तियुक्तं च तदेव स्वीकरणीयम् । हंसः नीरमिश्रितात् क्षीरात् क्षीरमेव स्वीकरोति इति प्रसिद्धिरस्ति । तद्वत् सारं स्वीकरोतु । निस्सारं सर्वं त्यजतु" इति ।

एवं त्याज्यग्राह्यविवेचनधिया स अनेकान् ग्रन्थान् पठित्वा क्रमेण **सोपानारोहणन्यायेन** एकैकां कक्षाम् उत्तीर्य उन्नतं विजयं प्राप्तवान् ।

विजयिनं तम् अनुमोदयितुम् एकदा विद्यालये समादरणसभा समायोजिता । "प्रासादमारोढुमिच्छुः क्रमशः सोपानमारुह्य यथा लक्ष्यं प्राप्नोति तथा एव विजयिनः अस्य लक्ष्यप्राप्तिः" इति प्रथमाध्यापकः अनुमोदनसमये अवदच्च । गुरुवचनं श्रुत्वा सन्तुष्टः स तु

**सिंहावलोकनन्यायेन** आत्मनः चरितं सर्वमपि पुनरवालोकयत्। तदनु स्वयमेवमुक्तवान् -

गच्छन् पिपीलको याति
योजनानां शतान्यपि ।
अगच्छन् वैनतेयोऽपि
पदमेकं न गच्छति ।।






**पदच्छेदः**

| | | |
|---|---|---|
| विमुखस्सन् | - | विमुखः+ सन्। |
| न्यवेदयच्च | - | न्यवेदयत् + च। |
| बालोऽयं | - | बालः +अयम्। |
| प्रसिद्धिरस्ति | - | प्रसिद्धिः + अस्ति। |

| | | |
|---|---|---|
| यदवश्यम् | - | यत्+ अवश्यम् । |
| तदेव | - | तत् +एव । |
| पुनरवालोकयत् | - | पुनः+ अवालोकयत् । |
| शतान्यपि | - | शतानि+ अपि। |
| वैनतेयोऽपि | - | वैनतेयः+ अपि । |

**विग्रहः**

| | | |
|---|---|---|
| गुडगुलिकान्यायेन | - | गुडः च गुलिका च गुडगुलिके ते अधिकृत्य कृतः न्यायः, तेन । |
| नीरक्षीरन्यायेन | - | नीरं च क्षीरं च नीरक्षीरे , ते अधिकृत्य कृतः न्यायः, तेन । |
| सिंहावलोकनन्यायेन | - | सिंहस्य अवलोकनं सिहावलोकनम्, तदधिकृत्य कृतः न्यायः, तेन । |
| निःसारम् | - | निर्गतः सारः यस्मात् तत् । |
| वैनतेयः | - | विनतायाः अपत्यं पुमान् । |

## पठनप्रवर्तनानि



**आशयं पठित्वा अत्र उचितः न्यायः कः इति लिखतु ।**

**क)** वस्त्रापणं गत्वा रीना विविधेभ्यः वस्त्रेभ्यः उचितं वस्त्रं क्रीणाति ।

**ख)** शताभिषिक्तः पितामहः एकान्ते स्वस्य जीवनम् अनुस्मरति ।

**ग)** कश्चित् दरिद्रः युवा कठिनेन परिश्रमेण क्रमेण आपणावलिं स्थापयामास ।

**घ)** न्यायाधिपेन दण्डितः चोरः कारागारे स्थित्वा स्वापराधान् अचिन्तयत् ।

**ङ)** अध्यापकः चलच्चित्रगानं श्रावयित्वा विविधान् अलङ्कारान् पाठयति ।

**श्रद्धेयौ अंशौ**

आशयावगमनम् ।

उचितस्य न्यायस्य चयनम् ।



**लौकिकन्यायानां सम्पुटं निर्मातु।**

**श्रद्धेयौ अंशौ**

उचितस्य न्यायस्य चयनम्।
आशयानुसारं क्रमीकरणम्।



**न्यायप्रतिपादकं लघुविवरणं / वाक्यं वा लिखतु / सञ्चिनोतु।**

**श्रद्धेयाः अंशाः**

उचितवाक्यघटना।
भाषाशैली।

उचितस्य न्यायस्य प्रयोगः।



**प्रयोगविशेषं ज्ञात्वा वाक्यं परिवर्तयतु।**

**उदा-** **बालकः** कथा रोचते। **बालकाय** कथा रोचते।

**सीता** लड्डुकं रोचते। **सीतायै** लड्डुकं रोचते।

**क)** भ्रमरः मधु रोचते।

**ख)** रमा फलरसं रोचते।

**ग)** राजीवः क्रीडा रोचते।

**घ)** अनुजा चोकलेहः रोचते।

**श्रद्धेयौ अंशौ**

विभक्तिबोधः।

वाक्यस्य साधुता।



**कथां प्रादेशिकभाषया परिवर्त्य लिखतु।**

**श्रद्धेयौ अंशौ**

भाषाशैली।

सम्पूर्णस्य आशयस्य स्वीकारः।



**आधुनिकेषु वार्तामाध्यमेषु विभिन्नप्रकाराः वार्ताः अनुदिनं दृश्यन्ते। तासु विविच्य उचिताः स्वीकरणीयाः खलु। तर्हि तत्र कः न्यायः योजनीयः? सत्यासत्यविवेचनमधिकृत्य चर्चां च करोतु।**

**श्रद्धेयाः अंशाः**

उचितचयनम् ।

आशयावगमः ।


उचितस्य न्यायस्य प्रयोगः ।

## क्रियापदपरिचयः

**खादेयुः -** खाद् भक्षणे परस्मैपदी विधिलिङ् प्र.पु.ब.व ।
खादेत् -खादेताम् - खादेयुः ।

**आरभत -** आङ् उपसर्गपूर्वक रभ्- राभस्ये आत्मनेपदी लङ् प्र.पु.ए.व ।
आरभत - आरभेताम् - आरभन्त ।

**त्यजतु -** त्यज हानौ परस्मैपदी लोट् प्र.पु.ए.व ।
त्यजतु/त्यजतात् - त्यजताम् - त्यजन्तु ।



सुग्रीवाज्ञा, भगीरथप्रयत्नम् इत्यादीनां भाषाशैलीनां समाहरणम् अवतारणं च करोतु ।